लोकप्रियसाहित्यग्रन्थमाला–४९

# वीरभद्र-रचनावली

## ( प्रथमो भागः )



प्रधानसम्पादकः
**प्रो. परमेश्वरनारायणशास्त्री**
कुलपतिः

सम्पादकः
**महराजदीन पाण्डेयः**

राष्ट्रियसंस्कृतसंस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
नवदेहली

लोकप्रियसाहित्यग्रन्थमाला–89

# वीरभद्र-रचनावली

## ( प्रथमो भागः )

प्रधानसम्पादकः

**प्रो. परमेश्वरनारायणशास्त्री**

कुलपतिः

सम्पादकः

**महराजदीन पाण्डेयः**

राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः

राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

नवदेहली

# अनुक्रमः


पुरोवाक् –प्रो. परमेश्वर नारायण शास्त्री *iii*

सम्पादकीयम् *v*

श्रीवीरभद्र मिश्रस्य जीवनवृत्तम् *xxi*

वीरभद्रस्य कृतित्वे विहंगमा दृष्टिः xxii

श्रीवीरभद्राष्टकम् *xxvii*


## खण्ड : 1 कविता ( प्रथमो भागः )


1. नव वर्षस्वागतम् 3
2. लब्ध श्वासः 3
3. भो! जरद्गवाः! 4
4. को ब्रूते जगतोऽस्ति नियन्ता 5
5. आशु वर्धय वेतनं नः 5
6. राजनीतेः इन्द्रजालम् 6
7. अहमपि कविः प्रशस्तः 7
8. ईदृश एव सुकालः 7
9. शेते क्व ते स भगवान् 8
10. यतोऽहं पुजारी 9
11. इदं निबोध रहस्यम् 9
12. पतिव्रताहं नारी 10
13. अहं भारतीयः 10
14. संस्कृतवाचोधुरंधरोऽहम् 11
15. एकता भेदेऽपि गूढा 12

मयि दयस्व, दयस्व भामिनि! त्वं विहस जगदूर्जितं स्यात्।
ब्रूहि किं करवाणि यत् ते देवि! वदनं...........................।।

अहह! रोदिति दास एषः
निःसहस्ते क्लेश-लेशः
तावके वदने विषण्णे
जीवितुं च पलाय नेशः

अयि विहस देवि! प्रतीक्षाश्यामलं कुमुदं सितं स्यात्।
ब्रूहि किं करवाणि यत् ते देवि! वदनं सस्मितं स्यात्।।

अधिचरणमेष प्रणामः
निष्फलायति, विधिर्वामः।
तालुरे भ्राम्यामि सीदन्
जीर्णशक्तिः कामकामः।

अस्ति मे मृत्युर्न दूरे देवि! हस, मे जीवितं स्यात्।
ब्रूहि किं करवाणि यत् ते देवि! वदनं सस्मितं स्यात्।।

अक्टूबर-1980

## क्रन्दन् विलपन्

क्रन्दन् विलपन् चाटूनि वदन्
गायामि सदा ते संगीतम्
भुवि कोऽपि शृणोतु न वा शृणुयात्
गायामि तवैव कृते गीतम्

दीर्घे नयने कुटिलाः केशा ओष्ठे च धगद्धगमंगारं
भाले तिलकं मुनिमानहरं कथमेव सहेऽहं शृंगारं
एकेन कटाक्षबलेनेदं सकलं जगदेव वशे नीतम्।
क्रन्दन्विलपन्................ते संगीतम्।

मुग्धानि गतानि नवा भावा उन्मुक्ततरं यानं हसनं
वाणीमधुरा पिककण्ठकला ममधैर्यकृते सर्वंगरलं
एषोऽनुभवामि यथा मद्यं सहसा सकृदेव मया पीतं
क्रन्दन्...............................संगीतम्।

लोकप्रियसाहित्यग्रन्थमाला–९०

# वीरभद्र-रचनावली

## ( द्वितीयो भागः )

प्रधानसम्पादकः
**प्रो. परमेश्वरनारायणशास्त्री**
कुलपतिः

सम्पादकः
**महराजदीन पाण्डेयः**

**राष्ट्रियसंस्कृतसंस्थानम्**
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
**नवदेहली**

# अनुक्रमः

## गन्धवहः

### (समकालिकाः विषयाः वीरभद्रस्य पत्रकारिता च)


| | | |
|---|---|---|
| 1. | प्रास्ताविकम् | 3 |
| 2. | संस्कृतस्य युगानुरूपिणीमुपयोगितामन्विष्यन्तु | 9 |
| 3. | संस्कृताराष्ट्रभाषा | 10 |
| 4. | संस्कृतालोकेन योजनीया | 12 |
| 5. | संसदि राष्ट्रभाषा | 14 |
| 6. | प्राच्यपद्धत्याऽध्ययनस्य भिन्नादिक् | 15 |
| 7. | अहोपरीक्षाव्यवस्था ! | 18 |
| 8. | का नाम क्रान्तिः ! नैषाक्रान्तिः | 20 |
| 9. | जातिवादो निन्द्यः | 23 |
| 10. | भविष्यति कोऽपि जनप्रतिनिधिः निरंकुशो माभूत् | 25 |
| 11. | इमे यां शाखामधिष्ठिताः तामेव छिन्दन्ति | 27 |
| 12. | पित्रोः जात्या पुत्रस्य परीक्षणं नैव सम्भवति | 30 |
| 13. | शिक्षायै सर्वोच्चा प्राथमिकता देया | 31 |
| 14. | क्रान्तिं विना न प्रगतिः | 33 |
| 15. | भाषा केवलं भावसंक्रमण माध्यमम् | 35 |
| 16. | न केवलम् उपदेशः, कर्मणा उदाहरणानि देयानि | 37 |
| 17. | मंदिरे प्रभूतस्वर्णराशेः का नामौचिती | 38 |
| 18. | ईश्वरभक्तिरूपा संस्था ऽधुना अकल्यणाय कल्पते | 40 |

धनं लिप्सवः सामान्यजनैः निरपेक्षबुद्धिभिः उपेक्ष्यमाणाः स्वयं नाशोन्मुखाः संस्कृतामपि नाशयन्ति। अब्राह्मणा अपि संस्कृताम् पठित्वैव अशस्त्रपाणयः योद्धार इव हेलयः हेलय इति ब्रुवाणा ब्राह्मणेभ्यो द्रुह्यन्ति। न संस्कृता ब्राह्मणानां हस्ते विक्रीता। वस्तुतः शिक्षितः अध्ययनाध्यापने संलग्नः मानवो ब्राह्मण इत्येव संस्कृता परिपाटी। स्वार्थसिद्ध्यै समाजस्यावस्थायां तथाकथितैः ब्राह्मणैः या जडता उत्पादिता सा संस्कृतप्रचारेण दूरीभविष्यति। को नाम अधीतसाङ्गवेदे आलोडितदर्शनशास्त्रे किरातेऽपि शिवत्वं न निश्चिनुयात्; को वा अनक्षरज्ञे बृहस्पतिपुत्रे ब्राह्मणबुद्धिं बध्नीयात्। किन्तु एतत् स्वारस्यं तदैव सम्भवति यदा गृहे–गृहे संस्कृतायाः प्रचारः स्यात्। एकेन पाश्चात्यविदुषा गोल्डष्टुकर महोदयेन सुष्ठूक्तं यत् "भारते कोऽपि दोषः स्थातुं न शक्नोति यदि सर्वे भारतीयाः स्पष्टं जानन्तु यत् वेदे किं लिखितम्।" यस्य ब्राह्मणस्य हृदये त्यागः, ज्ञानं, तपस्या, स्वाध्यायः, अकातर्य्यम्, अलोभः च नास्ति स कुतो ब्राह्मणः? निर्धनस्य पुत्रो यदि शतिकः सम्पद्यते स श्रेयान् किन्तु कोटीश्वरस्य पुत्रो यदि शतिकः स सर्वनाशी एव वक्तुम् उचितः। तथैव ब्राह्मणगृहे जातः लोभी, अलसः, अतपस्वी, असंस्कृतज्ञो वस्तुतः तथाविधशूद्रात् नीचतरः। ब्राह्मणानाम् अब्राह्मणानां च उद्धारः, द्वयोः सामरस्यं च तदैव स्यात् यदा उभये संस्कृतज्ञा भवेयुः।

इन्दिरागान्धी यदा प्रधानमंत्रिरूपेण देशे किंचित् परिवर्तनम् आनेतुं चेष्टितवती तदा तया 'क्रान्तिः...........क्रान्तिः' इति घुष्टम्। यदा च तस्या विरोधिभिः तस्या हस्तात् सत्ता गृहीता तदा तैरपि क्रान्तिः भूता क्रान्तिः भूता इति घुष्टम्। क्रान्तिशब्दे कुत ईदृशो व्यामोह इति न स्पष्टम्। हठादेव बलप्रयोगपूर्वकं शासनतन्त्रोच्छेद सहितं यत्र नवीनं तन्त्रं स्थाप्यते सैव क्रान्तिः नान्यथा! किंदेशस्य वैधेन सर्वकारेण अपि क्रान्तिः कर्तुं शक्यते? तदीयानि कार्याणि तन्त्रानुकूलानि एव कथयिष्यन्ते। देशस्य संपूर्णतन्त्रमपि यदि निर्वाचितसदस्यैः निर्णीयं परिवर्त्यते तदापि क्रान्तेः कथावकाशो नास्ति!

न च दृश्यते क्रान्तिफलम्। आपात्कालघोषणायाः प्राक् या दशा आसीत् सैव पुनः दृश्यते। केवलम् आपात्कालीनाअत्याचाराः शान्ताः। किन्तु अत्याचारिणः स्वैरं स्वीयानि पूर्वकृत्यानां साधुत्वं साधयन्ति। केवलं व्यक्तयः परिवर्तिताः वार्ताः ता एव। यथा ग्रामोफोनरिकार्डानिशासकपक्षतः रहस्यगोपानम्, अकर्मण्यता, क्रियते–क्रियते इति घोषः, स्वसत्तास्थिरतायै स्वपक्षिणाम् अपराधमुक्तिः परपक्षिणां

## सम्पादकः



**जन्मः –** 30.11.1956 तमे ख्रिष्टाब्दे उत्तर प्रदेशे गोण्डा जनपदस्य तरबगंजतहसीलान्तर्गते महादेव इत्यभिधे ग्रामे।

**शिक्षाः –** एम०ए०, पी-एच०डी०।

**वृत्तिः –** डा० राम मनोहर लोहिया अवध विश्वविद्यालयान्तर्गतस्य गोण्डा जनपदे बभनानोपनगरस्थस्य आचार्यनरेन्द्रदेवकिसान स्नातकोत्तर महाविद्यालयस्य संस्कृतविभाग उपाचार्यः। 1984 ख्रिष्टसंवत्सरात्तत्रैव शोधनिर्देशन शोध कार्यञ्च सम्पादयन्नध्ययनाध्यापनकर्मणि रतः।

**रचनं प्रकाशनञ्चः** 1. बीसवींशताब्दी के संस्कृत महाकाव्यों में राष्ट्रियचेतना (शोधः)

2. मौनवेधः (संस्कृत ग़ज़ल-गीति संग्रहः –उ०प्र० संस्कृत अकादम्या पुरस्कृतः।)

3. काक्षेण वीक्षितम् (संस्कृत ग़ज़ल गीति संग्रहः)

4. मध्ये मेघयक्षयोः (सन्देशकाव्यम्) प्रकाशनाधीनम्।

5. एकं सांगीतरूपकम् एकं शोधलेखसंग्रहश्च सद्यः प्रकाश्यौ।

विभिन्न पत्रपत्रिकासु संस्कृतहिन्दीभाषयोश्च लेखाः शोध लेखाः कविताश्च प्रकाशिताः।

प्रथम रचना (लघुरेको हिन्दीकाव्यसंग्रहः) 1970 तमेऽब्दे प्रकाशिता। 1974 तमेऽब्दे रचिता 'वेदना (हिन्दी खण्डकाव्यं)' 1976 तमेऽब्दे च रचिता 'स्फुरन्ती (हिन्दी काव्य संग्रहः)' अद्यावधि अप्रकाशिते स्तः।

प्रथमा संस्कृत कविता 1977 तमे वर्षे सर्वगन्धेति मासिक्यां प्राकाश्यमभजत्। आदौ सर्वगन्धायामेव महाराजो वात्स्यायन इति नाम्ना ततश्च दूर्वादि संस्कृत पत्रिकासु ऐहिक इत्युपनाम्नाऽनेका रचनाः प्रकाशिताः। सम्प्रति विभाष इत्युपनाम्ना रचनाकर्मणि प्रवृत्तः।

**स्थायी संकेतः –** ग्रामः – महादेवः, पत्रालयः – परसदा, जनपदम्-गोण्डा 271401

दूरवाणी- 9451027704

## राष्ट्रियसंस्कृतसंस्थानम्

(भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः)

**56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058**

**ई-मेल : rsks@nda.vsnl.net.in**

**वेबसाईट : www.sanskrit.nic.in**